International Journal of Sanskrit Research 2021; 7(5): 326-328

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 326-328
© 2021 IJSR
www.anantaajournal.com
Received: 16-07-2021
Accepted: 20-08-2021

**Dr. Arundhati Ojha**
Assistant Professor,
Sanskrit D.D (Auto.) College,
Keonjhar, Odisha, India

**Corresponding Author:**
**Dr. Arundhati Ojha**
Assistant Professor,
Sanskrit D.D (Auto.) College,
Keonjhar, Odisha, India

# धर्मशास्त्रे राजधर्मः

**Dr. Arundhati Ojha**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i5f.1526

## प्रस्तावना

भारतवर्षेषु उपलब्धषु शास्त्रैषु धर्मशास्त्रस्य प्रामाण्यं प्रशास्त्यञ्च सुविदितम् । धर्मशास्त्रे मुख्यतया आचार-व्यवहार-प्रायश्चित्ताख्याः त्रयोऽध्यायाः समुपलभ्यन्ते । तेषु त्रिषु अध्यायेषु आचारस्य प्राथम्यं पायज वरीवर्त्तते। आचारप्रसङ्गे वर्णितेषु राजधर्मप्रकरणस्य स्थानमतीव महत्त्वपूर्णम्। अपि च, विज्ञानेश्वर: भविष्यपुराणरीत्या धर्मस्य षड्भेदान् प्रदर्शयति। यथा - 'अत्र च धर्मशब्द: षट्विधस्मार्तधर्मविषयः। तद्यथा वर्णधर्म-आश्रमधर्म-वाश्रिमधर्म-गुणधर्म-निमित्तधर्म-साधारणधर्मश्चेति। स्य एतेष प्रकारेषु गुणधर्मरूपस्य राजधर्मस्य प्राधान्यं सर्व शास्त्रकारैरङ्गीकर्तव्यं यतः, एतान् सर्वान् राजधर्म एव जीवयति।

बह्माण: बाहुजातस्य क्षत्रियस्य धर्म एव राजधर्म इत्युच्यते। प्रजानां रक्षैव क्षात्रियस्य परमो धर्म:। अपि च प्रजारक्षानिमित्तं राजा शत्रवः जेतव्याः। प्रजापालनत्तपरः क्षत्रियो राजेत्युक्तः। अतो राजधर्म: क्षत्रियधर्मश्चभिन्नाविति स्वत: सिद्धम्। समासतः प्रजारक्षणम्, दानम्, यज्ञोऽध्ययन, विषयेष्वनासक्तिश्च क्षात्रधर्माः भवन्ति। परन्तु, प्रजारक्षणं पालनं वा राज्ञः प्रधानधर्मत्वेन स्वीकृतम्। वेदप्राप्त्यर्थम् उपनयनसंस्कारयुक्तं क्षत्रियेण राज्ञा वा शास्त्रानुसारेण नियमतो प्रजानां रक्षणं कर्तव्यम्। तद्यथा मनुस्मृतौ

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ।।

मिताक्षराकारविज्ञानश्वेरमतेन ‘शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादिः राजधर्मः। वैदिकयुगात् तथा स्मृतियुगादारभ्य पुराणयुगपर्यन्त राजधर्मस्य प्रशंसा सर्वत्र भूयो भूयो गीयते। कौटिल्य: तस्य अर्थशास्त्रे राजधर्मस्य प्राधान्यं प्रकटयति स्म। तन्मतेन - ‘ राजधर्मोऽसौ ब्राह्मणक्षत्रियादीनां चतुर्वर्णानां ब्रह्मचर्यादीनां चतुर्णामाश्रमाणां लोकसमूहस्य सदाचारस्य च रक्षकस्तथा सर्वधर्माणां प्रवर्तकः। ततो राजधमः सर्वधर्मेषु प्रधानः। तस्य मतेन धर्म: व्यवहारः, चरित्रम, राजशासनञ्चेति विवादार्थस्य चत्वारः पापा, तेषु राजशासनमेव मुख्यम्। याज्ञवल्क्यस्मृति: राज्याभिषेकादिगुणयुक्तस्य गुहस्थस्य राज्ञो विशेषधर्मान् वर्णयन्ती कथयति यत् नाश्नीयात्सन्धिवेलायाम्। मनु- ४/५५

अदीर्घसूत्रः स्मृतिमानक्षुद्रऽपरूषस्तथा ।
धार्मिकोऽव्यसनश्चैव प्राज्ञ: शुरो रहस्यवित् ।।

स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च ।
विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः ।।

स तु श्रौतस्मार्तधर्मान् पालयेत्तथा भूरिदक्षिणां दत्त्वा यज्ञांश्चैव कुर्यात् । तद्यथां -

श्रौतस्मार्त्तक्रियाहेतोवृणुयादेव चर्विजः ।
यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान् ।।

प्रजापालनमेव राज्ञः सर्वप्रथमं कर्तव्यम्। प्रजाः परिपालयन् परिपालितप्रजोपहित पुण्यात् षडभागं प्राप्नोति। तदेव याज्ञवल्क्येनोक्तम् यत्

पुण्यात्षड्भागमादत्ते न्यायेन परिलपायन् ।
सर्वदानाधिकं यस्मात्प्रजानां परिपालनम् ।।

अरक्षमाणानां प्रजानां पापात् नृपतिरर्धं लभते। यतो हि राजा रक्षणार्थं प्रजाभ्यः करान् गृहणाति। तद्यथा –

अरक्षमाणा: कुर्वन्ति यत्किञ्चित्किल्विषं प्रजाः ।
तस्मात्तु नृपतेर) यस्माद् गृहणात्यसौ करान् ।।

यो राजा स्वराष्ट्रादन्यायेन द्रव्यमादाय स्वकोशमभविवर्धयेत् स तु विगतश्रीभूतवा बन्धुभिः सह नाशं प्राप्नोति। अपि च

प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञ: कुलं श्रियं प्राणाश्चदग्ध्वा न निवर्तते ।।

शङ्खस्मृतौ –

न व्रतैर्नोपवासैश्च न च यज्ञैः पृथग्विधैः ।
राजा स्वर्गमवाप्नोति प्राप्नोति परिपालनात् ।।

अर्थात्, व्रतोपवासयज्ञादिनानाविधं कर्म कृत्वापि राजा स्वर्ग न लभते । परन्तु, प्रजापालनेनैव तत् प्राप्नोति। अत्रिस्मृतौ –

दृष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोशस्य च संप्रवद्धिः।
अपक्षपातोर्थिषु राष्टरक्षा पञ्चैव यज्ञाः कथिता नृपाणाम् ॥
यत्प्रजापालने पुण्यं प्राप्नुवन्तीह पार्थिवाः ।
न तु क्रतुसहस्रेण प्राप्नुवन्ती द्विजोत्तमाः॥

अर्थात् दुष्टस्य दण्डः, सुजनस्य पूजा, न्यायेन कोशस्य संप्रवृद्धिः प्रार्थीषु पक्षपातराहित्यं, राष्टरक्षा चेतैव पचयज्ञाः सन्ति। इह राजानः प्रजापालने यत्पुण्यं प्राप्नुवन्ति तदेव द्विजोत्तमाः यज्ञानुष्ठानेन लभ्यन्ते। सहस्रहारितस्मृतौ वर्णितमस्ति यत् -

राज्यस्थः क्षत्रियश्चपि प्रजाधर्मेण पालयन्।
कुर्यादध्ययनं सम्ध्यजेद्यज्ञान्यथाविधिः ।।
दद्यादानं द्विजातिभो धर्मबुद्धिसमन्वितः ।
स्वभार्यानिरतो नित्यं षड्भागार्हः सदा नृपः ।।
नीतिशास्त्रार्थकुशल: सन्धिविग्रहतत्त्ववित् ।
देवब्राह्मणभक्तश्च पितृकार्यपरस्तथा ।।

अर्थात्, क्षत्रियो राजा धर्मेण प्रजा: पालयेत्, वेदाध्ययनं कुर्यात्, यश कुर्यात्, दानं दद्यात्, स्वभार्यानिरतो भवेच्च। एवं प्राकारेण राजा सदा षष्ठांशं कररूपेण नयति । स तु नीतिशास्त्रार्थकुशल: सन्धिविग्रहतत्वविद्देव ब्राह्मणभक्तश्च पितृकर्मणि तत्परो भवेत्। पराशरस्मृतौ वर्णितम् -

क्षत्रियो हि प्रजां रक्षच्छत्रपाणिः प्रचण्डवत् ।
निर्जित्य परसैन्यानि क्षिति धर्मेण पालयेत् ।।

अर्थात् क्षत्रियो राजा शस्त्रं धृत्वा प्रचण्डभावेन प्रजारक्षेत्तथा शत्रुसेनां जित्वा धर्मपूर्वकं पृथ्वी पालयेत्। शङ्खलिखितस्मृतौ -

गावो भूमि: कलत्र च ब्रह्मस्वहरणं तथा।
यस्तु न त्रायते राजा तमाहुर्बह्मघातकम् ।।
दुर्बलानामनाथानां बालवृद्धतपस्विनाम् ।
अन्यायैः परिभूतानां सर्वेषां पार्थिवो गतिः ।।
पक्षिणां बलमाकाशं मत्स्यानामुदकं बलम् ।
दुर्बलस्य बलं राजा बालस्य रूदितं बलम् ।।
बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलम् ।।

अर्थात्, य: राजा गो-भूमि-कलत्र-ब्रह्मास्वादीनां रक्षां न करोति स तु ब्रह्मघातक इति कथ्यते । दुर्बलानामनाथानां बालवृद्धतपस्विनामन्यायैः परिभूतानां सर्वेषामेव राजा एकमात्र गतिरेव। यथापक्षिणामाकाशं, मत्स्यानामुदकम्, बालस्य क्रन्दनं, मूर्खस्य मौनं, तस्करस्यानृतं च बलं भवति तथा दुर्बलस्य बलं राजा भवति।
अन्येषु पुराणेष्वपि एतद्विषये वर्णितमस्ति। तेषु मार्कण्डेयपूराणे चतुर्विंशोऽध्याये राजधर्मविषये वर्णितमस्ति। यत् राजाऽभिषिक्तो भूत्वा धर्मानुसारेण प्रजारञ्जनं कुर्यात्। तदेव तस्य प्रथमकर्तव्यम्। अग्निपुराणानुसारं - राष्ट्रपीडाकरो राजा चिरं नरके वसेत्। महाभारतानुसार- राजा सर्वप्रथममात्मनि विजयं प्राप्नुयात्। कौटिल्यार्थशास्त्रे वर्णितमस्ति यत्- राजा कामादिषड्वर्गं

त्यक्तवा जितेन्द्रियः सन् तिष्ठेत्। वृद्धविद्वद्भिः संयोगेन आत्मनो विकासं कुर्यात्। गुप्तचरैः स्वस्याऽपरस्य च राष्ट्रव्यवस्थां पश्येत्। स्वव्यवहारैः प्रजानां हितसाधनमपि कुर्यात्। याज्ञवल्क्यस्मृतौ " –

उपाया: सामदानं च भेदो दण्डस्तथैव च ।
सम्यक्प्रयुक्ता : सिद्ध्येयुर्दण्डस्त्वगतिका गतिः ।।

अर्थात् नृपः राज्यशासने साम: दानं भेदः दण्डश्चैतान् उपायान् गृहणीयात्, पण्डिता: राजनीतिज्ञविद्वासः सामादि उपायेषु सर्वदा राज्यवृद्ध्यर्थ दण्डनीते: प्रशंसा कुर्वन्ति । यथाह मनुना –

सामादीनामुपायानां चतुर्णामपि पण्डितः ।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ।।

अपि च महर्षियाज्ञवल्क्येनोक्तं यत् -

स्वाम्यमात्या जनो दुर्ग कोशो दण्डस्तथैव च ।
मित्राण्येता: प्रकृतयो राज्यं सप्ताङ्गमुच्यते ।।